
ಪಾರಮಾರ್ಥಿಕಾಶ್ರಮದ ಪುಸ್ತಕ


43



Q-3612

ಪುಸ್ತಕ ಸಂಖ್ಯೆ.....







॥ सदाशिवेन्द्रस्तुतिः ॥

श्रीमत्परमहंसेत्यादिसमस्तविरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि

श्रीसच्चिदानन्दशिवाभिनव

नृसिंहभारतीस्वामिभिः

विरचिता ।



श्रीरङ्गस्थ

श्रीवाणीविलाससमुद्रायन्त्रालये

संमुद्रिता ।

१९०८.





श्री जगद्गुरु संस्थान
सरस्वती भण्डार.
शृंगेरी.

॥ सदाशिवेन्द्रस्तुतिः ॥



परतत्त्वलीनमनसे
प्रणमद्भवबन्धमोचनायाशु ।
प्रकटितपरतत्त्वाय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १ ॥

परमशिवेन्द्रकराम्बुज-
संभूताय प्रणम्रवरदायं ।
पदधूतपङ्कजाय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २ ॥

विजननदीकुञ्जगृहे
मञ्जुलपुलिनैकमञ्जुतरतल्पे ।
शयनं कुर्वाणाय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३ ॥

कामाहिद्विजपतये
शमदममुखदिव्यरत्नवारिधये ।
शमनाय मोहवितते:
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ४ ॥

नमदात्मबोधदात्रे
रमते परमात्मतत्त्वसौधाग्रे ।
समबुद्धयेऽश्महेम्नोः
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ५ ॥

गलिताविद्याहाला-
हलहतपुर्यष्टकायबोधेन ।
मोहान्धकाररवये
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ६ ॥

शममुखषट्कमुमुक्षा
विवेकवैराग्यदाननिरताय ।
तरसा नतजनततये
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ७ ॥

सिद्धान्तकल्पवल्ली-
मुखकृतिकर्त्रे कपालिभक्तिकृते ।
करतलमुक्तिफलाय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ८ ॥

तृणपङ्कलिप्तवपुषे
तृणतोऽप्यधरं जगद्विलोकयते ।
वनमध्यविहरणाय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ९ ॥

निगृहीतहृदयहरये
प्रगृहीतात्मस्वरूपरत्नाय ।
प्रणताब्धिपूर्णशशिने
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १० ॥

अज्ञानतिमिररवये
प्रज्ञानाम्भोधिपूर्णचन्द्राय ।
प्रणताघविपिनशुचये
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ११ ॥

मतिमलमोचनदक्ष-
प्रत्यक्ब्रह्मैक्यदाननिरताय ।
स्मृतिमात्रतुष्टमनसे
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १२ ॥

निजगुरुपरमशिवेन्द्र-
श्लाघितविज्ञानकाष्ठाय ।
निजतत्त्वनिश्चलह्रदे
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १३ ॥

प्रविलाप्य जगदशेषं
परिशिष्टाखण्डवस्तुनिरताय ।
आस्यप्राप्तान्नभुजे
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १४ ॥

उपधानीकृतबाहुः
परिरब्धविरक्तिरामो यः ।
वसनीकृतखायास्मै
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १५ ॥

सकलागमान्तसार-
प्रकटनदक्षाय नम्रपक्षाय ।
सच्चित्सुखरूपाय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १६ ॥

द्राक्षाशिक्षणचतुर-
व्याहाराय प्रभूतकरुणाय ।
वीक्षापावितजगते
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १७ ॥

योऽनुत्पन्नविकारः
बाहौ म्लेच्छेन छिन्नपतितेऽपि ।
अविदितममतायास्मै
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १८ ॥

न्यपतन्सुमानि मूर्धनि
येनोच्चरितेषु नामसूग्रस्य ।
तस्मै सिद्धवराय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १९ ॥

यः पापिनोऽपि लोकान्
तरसा प्रकरोति पुण्यनिष्ठाग्र्यान् ।
करुणाम्बुराशयेऽस्मै
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २० ॥

सिद्धेश्वराय बुद्धेः
शुद्धिप्रदपादपद्मनमनाय ।
बद्धौघमोचकाय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २१ ॥

हृद्याय लोकवितते:
पद्यावलिदाय जन्ममूकेभ्यः ।
प्रणतेभ्यः पदयुगले
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २२ ॥

जिह्वोपस्थरतान-
प्याहोच्चारेण जातु नैजस्थ ।
कुर्वाणाय विरक्तान्
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २३ ॥

कमनीयकवनकर्त्रे
शमनीयभयापहारचतुराय ।
तपनीयसदृशवपुषे
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २४ ॥

तारकविद्यादात्रे
तारकपतिगर्ववारकास्याय ।
तारजपप्रवणाय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २५ ॥

मूकोऽपि यत्कृपा चेत्
लोकोत्तरकीर्तिराशु जायेत ।
अद्भुतचरितायास्मै
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २६ ॥

दुर्जनदूरायतरां
सज्जनसुलभाय हस्तपात्राय ।
तरुतलनिकेतनाय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २७ ॥

भवसिन्धुतारयित्रे
भवभक्ताय प्रणम्रवश्याय ।
भवबन्धविरहिताय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २८ ॥

त्रिविधस्यापि त्यागं
वपुषः कर्तुं स्थलत्रये य इव ।
अकरोत्समाधिमस्मै
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २९ ॥

कामिनमपि जितहृदयं
क्रूरं शान्तं जडं सुधियम् ।
कुरुते यत्करुणास्मै
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३० ॥

वेदस्मृतिस्थविद्व-
लक्षणलक्ष्येषु संदिहानानाम् ।
निश्चयकृते विहर्त्रे
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३१ ॥

बालारुणनिभवपुषे
लीलानिर्धूतकामगर्वाय ।
लोलाय चितिपरस्यां
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३२ ॥

शरणीकृताय सुगुणैः
चरणीकृतरक्तपङ्कजाताय ।
धरणीसदृक्षमाय
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३३ ॥

प्रणताय यतिवरेण्यैः
गणनाथेनाप्यसाध्यविघ्नहृते ।
गुणदासीकृतजगते
प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३४ ॥

सहमानाय सहस्रा-
　　ण्यप्यपराधान्प्रणम्रजनरचितान् ।
सहसैव मोक्षदात्रे
　　प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३५ ॥

धृतदेहाय नतावलि-
　　तूर्णप्रज्ञाप्रदानवाञ्छातः ।
श्रीदक्षिणवक्त्राय
　　प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३६ ॥

तापत्रयार्त्तहृदयः
　　तापत्रयहारदक्षनमनमहम् ।
गुरुवरबोधितमहिमः
　　शरणं याचे तवाङ्घ्रिकमलयुगम् ॥ ३७ ॥

सदात्मनि विलीनहृत्सकलवेदशास्त्रार्थवित्
　　सरित्तटविहारकृत्सकललोकहृत्तापहृत् ।
सदाशिवपदाम्बुजप्रणतलोकलभ्यप्रभो
　　सदाशिवयतीट् सदा मयि कृपामपारां कुरु ॥ ३८

पुरा यवनकर्तनस्रवदमन्दरक्तोऽपि यः
पुनः पदसरोरुहप्रणतमेनमेनोनिधिम् ।
कृपापरवशः पदं पतनवर्जितं प्राप यत्
सदाशिवयतीट् स मय्यनवधिं कृपां सिञ्चतु ॥३९॥

हृषीकहृतचेतसि प्रहृतदेहके रोगकैः
अनेकवृजिनालये शमदमादिगन्धोज्झिते ।
तवाङ्घ्रिपतिते यतौ यतिपते महायोगिराट्
सदाशिव कृपां मयि प्रकुरु हेतुशून्यां द्रुतम् ॥४०॥

न चाहमतिचातुरीरचितशब्दसङ्घैः स्तुतिं
विधातुमपि च क्षमो न च जपादिकेऽप्यस्ति मे ।
बलं बलवतां वर प्रकुरु हेतुशून्यां विभो
सदाशिव कृपां मयि प्रवर योगिनां सत्वरम् ॥४१॥

शब्दार्थविज्ञानयुता हि लोके
वसन्ति लोका बहवः प्रकामम् ।
निष्ठायुता न श्रुतदृष्टपूर्वा
विना भवन्तं यतिराज नूनम् ॥ ४२ ॥

स्तोकार्चनप्रीतहृदम्बुजाय
पाकाब्जचूडापररूपधर्त्रे ।
शोकापहर्त्रे तरसा नतानां
पाकाय पुण्यस्य नमो यतीशे ॥ ४३ ॥

नाहं हृषीकाणि विजेतुमीशो
नाहं सपर्याभजनादिकर्त्तुम् ।
निसर्गया त्वं दययैव पाहि
सदाशिवेमं करुणापयोधे ॥ ४४ ॥

कृतयानयानतावलि-
कोटिगतेनातिमन्दबोधेन ।
मुदमेहि नित्यतृप्त-
प्रवरस्तुत्या सदाशिवाश्वाशु ॥ ४५ ॥

श्रीमत्परमहंसेत्यादिसमस्तविरुदाङ्कित श्रीजगद्गुरु
शृङ्गगिरि श्रीसच्चिदानन्दशिवाभिनव
नृसिंहभारतीस्वामिभिः
विरचिता
सदाशिवेन्द्रस्तुतिः
समाप्ता ।



॥ सदाशिवपञ्चरत्नम् ॥

यत्संदर्शनमात्रा-
द्भक्तिर्जाताप्यविद्धकर्णस्य ।
तत्संदर्शनमधुना
कृत्वा नूनं कृतार्थोऽस्मि ॥ १ ॥

योऽनिशमात्मन्येव
ह्यात्मानं संदधद्भीथ्याम् ।
भस्मच्छन्नानल इव
जडाकृतिश्चरति तं नौमि ॥ २ ॥

यस्य विलोकनमात्रा-
च्चेतसि संजायते शीघ्रम् ।
वैराग्यमचलमखिले-
ष्वपि विषयेषु प्रणौमि तं यमिनम् ॥ ३ ॥

पुरतो भवतु कृपाब्धिः
पुरवैरिनिविष्टमानसः सोऽयम् ।
परमशिवेन्द्रकराम्बुज-
संजातो यः सदाशिवेन्द्रो मे ॥ ४ ॥

उन्मत्तवत्संचरतीह शिष्य-
स्तवेति लोकस्य वचांसि शृण्वन् ।
खिद्यन्नुवाचास्य गुरुः पुराहो
ह्युन्मत्तता मे न हि तादृशीति ॥ ५ ॥

पञ्चकमेतद्भक्त्या
श्लोकानां विरचितं लोके ।
यः पठति सोऽपि लभते
करुणां शीघ्रं सदाशिवेन्द्रस्य ॥ ६ ॥



